National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 228-230
© 2024 NJHSR
www.sanskritarticle.com

**J.S.V.N.Praveen Kumara Sarma**
Research Scholar,
Dept of Krishna Yajurveda,
S.V.Vedic University, Tirupati

**Correspondence:**
**J.S.V.N.Praveen Kumara Sarma**
Research Scholar,
Dept of Krishna Yajurveda,
S.V.Vedic University, Tirupati

# व्यासशिक्षायां द्वित्वप्रकरणविमर्शः

**J.S.V.N.Praveen Kumara Sarma**

**यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।**
**निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।।**

**शोधलोखसारः**

वेदस्य रक्षणार्थं प्रवृत्तानि शिक्षादीनि षडङ्गानि। तानि शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्यौतिषम्, कल्पः इत्यादीनि षडङ्गानि। यथा –

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां च यः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥**

**"स्वरवर्णाद्युच्चारणप्रकारो यत्र उपदिश्यते सा शिक्षा"**[1] इति कथ्यते। तत्र कृष्णयजुर्वेदसम्बद्धाः व्यासशिक्षादिशिक्षाग्रन्थाः बहवो विद्यन्ते। तत्र व्यासशिक्षायां अष्टाविंशति प्रकरणानि सन्ति। तेषु एकोनविंशप्रकरणे द्वित्वप्राप्तिः, एकविंशे प्रकरणे द्वित्वनिषेधश्च निरूपितो दृश्यते। तत्सङ्गृह्य शोधपत्रेऽस्मिन् निरूपयिष्यते।

**कूटशब्दाः**

वेदः, वेदाङ्गानि, शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पः, पाणिनीयशिक्षा, व्यासशिक्षा, द्वित्वम्, स्वरः, व्यञ्जनः, अच्, हल्, वर्णः, स्पर्शः, ह्रस्वः, नादः, ऊष्मः।

**शोधलेखः**

श्रुत्यर्थज्ञानाय येषां शास्त्राणाम् आवश्यकं वर्तते, तान्येव शास्त्राणि अङ्गानीति उच्यन्ते। इमानि वेदस्य रक्षणे, अर्थज्ञाने च सहायकानि भवन्ति। पाणिनीयशिक्षायां छन्दः पादस्थानीयमिति, कल्पः हस्तस्थानीय-मिति, ज्योतिषं चक्षुस्स्थानीयमिति, निरुक्तं श्रोत्रस्थानीयमिति, शिक्षा घ्राणस्थानीयमिति, व्याकरणं वेदस्य मुखस्थानीयम् इति निरूपितम्। यथा –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रौत्रमुच्यते।।**
**शिक्षा घ्रणां तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[2]

अङ्गसहितवेदाध्ययनेन ब्रह्मलोकं प्राप्नोति इति महर्षिभिः प्रतिपादितम्।

वैदिकमन्त्राणामुचितोच्चारणाय शिक्षायाः, कर्मकाण्डस्य यज्ञीयानुष्ठानस्य च निमित्ताय कल्पस्य, शब्दानां रूपज्ञानाय व्याकरणस्य, अर्थज्ञानाय निर्वचनाय च निरुक्तस्य, वैदिकच्छन्दसां ज्ञानलाभाय छन्दसः, अनुष्ठानस्योचितकालनिर्णयार्थं च ज्योतिषशास्त्रस्य इति एतोषां वेदाङ्गानाम् प्रयोजनमस्ति।

वेदस्य यथार्थज्ञानलाभाय षण्णां विषयाणां ज्ञानमपेक्षितं भवति। वेदमन्त्राणाम् अवितथोच्चारण-मेव प्रथममावशयकं भवति। शब्दमयमन्त्राणां यथार्थोच्चारणाय प्रवर्तमानं वेदाङ्गं शिक्षा इत्यभिधीयते । श्रुतिषु सर्वथा स्वरो मुख्यो भवति, स्वरभेदेन अर्थभेदो जायते। इदं स्वरविज्ञानं शिक्षाधीनं भवति। अतः शिक्षायाः सम्यक् अध्ययनेन, ज्ञानेन च वेदमन्त्राणां शुद्धम् उच्चारणं भवति।

तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षायाः निगदितं वर्तते। शिक्षा नाम **"स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा"**[3] इति विद्यारण्यस्वामिभिः तैत्तिरीयोपनिषद्भाष्ये शिक्षायाः लक्षणं वर्णितम्।

तत्र ऋग्वेदस्य पाणिनीयशिक्षा, शुक्लयजुर्वेदस्य याज्ञवल्क्यशिक्षा, कृष्णयजुर्वेदस्य व्यासशिक्षा, सामवेदस्य नारदीयशिक्षा, अथर्ववेदस्य माण्डुकीयशिक्षा इति प्रसिद्धाः शिक्षाग्रन्थाः।

कृष्णयजुर्वेदस्य तैत्तिरीयशाखायाः सम्बद्धाः व्यासादिनवशिक्षाः सुप्रसिद्धाः। यथा-

**प्रथमा व्यासशिक्षा च लक्ष्मीशिक्षा द्वितीयका।**
**भारद्वाजी तृतीया च शिक्षाऽरण्या तुरीयका।।**
**पञ्चमी शम्भुशिक्षाच षष्ठी चापिशली तथा।**
**सप्तमी पाणिनेः शिक्षा अष्टमी कौहली तथा।।**
**वासिष्ठी नवमी चैवं नवशिक्षाः प्रकीर्त्तिताः।।**[4]इति

एतासु नवशिक्षासु अन्यतमा प्रथमा शिक्षा व्यासशिक्षा। अस्यां व्यासशिक्षायां अष्टाविंशति प्रकरणानि सन्ति। तत्र एकैकस्मिन् प्रकरणे एकैकः विषयः निरूपितः। तेषु एकोनविंशप्रकरणे द्वित्वप्राप्तिः, एकविंशे प्रकरणे द्वित्वनिषेधश्च निरूपितो दृश्यते।

द्वित्वं नाम द्वयोः भावः द्वित्वम्, नाम समानवर्णद्वयत्वम् इत्यर्थः। कुत्र द्वित्वप्राप्तिः, कुत्र च द्वित्वनिषेधः इति ससूत्रं इदानीं प्रदर्श्यते। तथा च व्यासशिक्षायाम् –

**"स्वरपूर्व इयाद्वित्वं व्यञ्जनं व्यजनोत्तरे"**[5] इति। अर्तात् व्यञ्जनस्य स्वरपूर्वत्वे सति व्यञ्जनोत्तरत्वे सति तस्य व्यञ्जनस्य द्वित्वं भविष्यति। यथा – **"इषे त्वा"**[6] इति। अत्र तकारस्य स्वरपूर्वत्वात् व्यञ्जनपरत्वाच्च द्वित्वं भवति।

अस्मिन् सूत्रे स्वरपूर्वत्म्, व्यञ्जनोत्तरत्वम् इति दलद्वयम् अस्ति। केवलं व्यञ्जनोत्तरत्वम् इत्युक्ते **"प्रजननम्"**[7] इत्यत्र पकारस्य व्यञ्जनोत्तरत्वेपि द्वित्वं नास्ति। अतः सूत्रे स्वरपूर्वत्वम् इति निवेशितम्। एवम् **"अहृत एवास्य"**[8] इत्यत्र हकारस्य स्वरपूर्वत्वेपि द्वित्वं नास्ति। कुत इत्युक्ते व्यञ्जनोत्तरत्वाभावत्। अत एव सूत्रे व्यञ्जनोत्तरत्वम् इति निवेशितम्।

ततः द्वितीयं सूत्रम् एवम् अस्ति। **"लपूर्वे च वपूर्वे च द्वित्वं स्पर्श उपाप्नुयात्"**[9] इति। अर्थात् स्पर्शवर्णस्य पूर्वे लकारो वा वकारो वा अस्ति चेत् तस्य स्पर्शस्य द्वित्वम् आगच्छति। यथा - **"कल्म्माषी भवति"**[10] । अत्र मकारः स्पर्शवर्णः, तस्य पूर्वे लकारः अस्ति। अतः स्पर्शवर्णस्य मकारस्य द्वित्वम् आगच्छति। एवं **"विभूदाव्न्ने"**[11] इति। अत्र नकारः स्पर्शवर्णः, तस्य पूर्वे वकारः अस्ति। अतः नकारस्य द्वित्वम् आगच्छति।

ततः तृतीयं सूत्रम् - **"अच्पूर्वाद्रादियात् द्वित्वं वर्णमात्रोदये च हल्"**[12] इति। अर्थात् एकस्य व्यञ्जनस्य पूर्वभागे रेफः, तस्य पूर्वे स्वरवर्णः, परभागे व्यञ्जनो स्वरो वा अस्ति चेत् तस्य व्यञ्जनस्य द्वित्वं भवति। यथा – **"अर्च्चन्त्यर्क्कम्"**[13] इति। अत्र चकारस्य पूर्वेः रेफः, तस्य पूर्वे स्वरवर्णः अकारश्च अस्ति, परे अकारः स्वरवर्णः अस्ति। अतः चकारस्य स्वरपूर्वरेफात् वर्णममात्रोत्तरत्वात् द्वित्वं भवति।

ततः चतुर्थं सूत्रम् - **"ह्रस्वादन्तौ नङौ द्वित्वमाप्नुतो ह्यच्परावपि"**[14] इति। अर्थात् पदान्ते विद्यमानस्य नकारस्य, ङकारस्य च पूर्वे ह्रस्ववर्णम्, परे च अचो वा व्यञ्जनो वा भवति चेत् नकारस्य, ङकारस्य च द्वित्वं भवति। यथा – **"निरवपन्निन्द्राय"**[15] इति। अत्र "निरवपन्" इति एकं पदम्। पदान्ते विद्यमानस्य नकारस्य पूर्वे ह्रस्ववर्णः अकारः अस्ति, परे अच् वर्णः इकारः अस्ति। अतः नकारस्य द्वित्वं भवति। एवं **"युङ्ङसि"**[16] इत्यत्र युङ् इति पदम्, पदान्ते विद्यमानस्य ङकारस्य पूर्वे ह्रस्ववर्णः उकारः अस्ति, परे अच् वर्णः अकारः अस्ति। अतः ङकारस्य द्वित्वं भवति।

ततः पञ्चमं सूत्रम् - **"ह्रस्वाद् द्वित्वमनुस्वारः प्राप्नुयात्संयुते परे"**[17] इति। अर्थात् अनुस्वारस्य पूर्वे ह्रस्ववर्णः परे च संयुक्तवर्णः अस्ति चेत् अनुस्वारस्य द्वित्वम् आगच्छति। यथा - **"सग्ग्ंश्रवाहसौवर्च्चनसः"**[18] इति। अत्र अनुस्वारस्य पूर्वे ह्रस्ववर्णः अकारः अस्ति, परे संयुक्ताक्षरः "श्र" इति अस्ति। अतः अनुस्वारस्य द्वित्वम् आगच्छति।

ततः द्वित्वप्रकरणे अन्तिमं सूत्रम् - **"तदनुस्वारपूर्वश्च संयोगादिर्द्विरुच्यते"**[19] इति। अर्थात् पूर्वसूत्रोक्तप्रकारेण यत्र अनुस्वारस्य द्वित्वं प्राप्तं तस्य अनुस्वारस्य परे विद्यमानस्य संयुक्ताक्षरस्य आदौ यः हल् वर्णः भवति तस्य हलस्यापि द्वित्वम् आगच्छति इति। यथा- **"वायव्यग्ग्ंश्श्वेतमालभेत"**[20] इति। अत्र अनुस्वारस्य ह्रस्वपूर्वत्वात्, संयुक्तवर्णपरत्वाच्च द्वित्वं प्राप्तम्। अनेन सूत्रेण परे विद्यमानस्य हलः आदिः यः शकारः तस्यापि द्वित्वं भवति। एतावता द्वित्वप्राप्तिविशेषाः समाप्ताः। इतः परं निषेधाः निरूप्यन्ते।

**"ईदैत्पूर्वो यकारश्च विसर्गो रेफ एव च"**[21] इति। अर्थात् विसर्जनीयस्य, रेफस्य च द्वित्वं कदापि न भवति। परं ईकारपूर्वस्य, ऐकारपूर्वस्य यकारस्यापि द्वित्वं न भवति इति वर्णितम्। वस्तुतः तादृशयकारस्य द्वित्वप्राप्तिः नास्ति। प्राप्तस्यैव निषेधः कर्तव्यः। किन्तु उच्चारणकाले प्रमादात् द्वित्ववदुच्चारणं यकारस्य भवितुमर्हति **"प्रैयङ्गवम्"**[22] इत्यादि स्थलेषु। अतः तत् स्पष्टीकरणाय सूत्रे प्रतिपादितम्।

**"प्रथमोद्र्ध्वेऽच्परे चोष्मा वकारस्स्पर्श उत्तरे"**[23] इति। अर्थात् ऊष्मवर्णस्य प्रथमवर्णो वा, स्वरवर्णो वा परे सति तस्य ऊष्मवर्णस्य द्वित्वं न भवति। यथा – **"वायवस्थ"**[24] इति। अत्र सकारस्य स्वरपूर्वत्वात् व्यञ्जनोत्तरत्वाच्च द्वित्वं प्राप्तम्। किन्तु अत्र सकारः ऊष्मवर्णः, तस्य परे तकारः प्रथमवर्णः अस्ति। अतः ऊष्मवर्णस्य सकारस्य द्वित्वं नास्ति। अत्रायं विशेषः। वस्तुतः सकारपरे थकारः अस्ति। किन्तु **"अघोषादूष्मणः परः प्रथमोऽभिनिधान स्पर्शपरात्तस्य सस्थानः"**[25] इत्यनेन सूत्रेण अत्र थकारस्य पूर्वे अभिनिधानतकारागमो भवति। अतः "वायवस्थ" इत्यत्र सकारस्य द्वित्वं नास्ति।

**"ऊष्मस्पर्शपरस्थे तु लकारश्च तथैव हि"**[26] इति। अर्थात् लकारस्य ऊष्मवर्णो वा स्पर्शवर्णो वा परे सति द्वित्वं न भवति। यथा **"मल्हाः"**[27] इति। अत्र लकारस्य स्वरपूर्वत्वात् व्यञ्जनोत्तरत्वाच्च द्वित्वं प्राप्तम्। किन्तु अनेन सूत्रेण निषेधः क्रियते। "मल्हाः" इत्यत्र लकारस्य परे हकारः ऊष्मवर्णः अस्ति। अतः लकारस्य द्वित्वं नागच्छति। एवं **"शतवल्शम्**[28], **कल्प्पान्जुहोति"**[29] त्यत्रापि लकारस्य द्वित्वं नागच्छति।

**"वर्गीयानुत्तमोद्ध्र्वे हल् सवर्णोत्तर एव वा"**[30] इति। अर्थात् स्पर्शवर्णस्य परे समानवर्गाक्षरो वा, समानवर्णो वा भवति चेत् तस्य स्पर्शवर्णस्य द्वित्वं न भवति। यथा – **"शितिकण्ठाय"**[31] इति। अत्रापि णकारस्य स्वरपूर्वत्वात् व्यञ्जनोत्तरत्वाच्च द्वित्वं प्राप्तम्। किन्तु णकारस्य परे सवर्गीयः ठकारः अस्ति। अतः णकारस्य द्वित्वं न भवति।

**"यवहेषु परस्थेषु नकारश्चान्तगस्त्विति"**[32] इति। अर्थात् पदान्ते विद्यमानस्य नकारस्य परे य-व-ह एते वर्णाः भवन्ति चेत् तस्य नकारस्य द्वित्वं न भवति। यथा – **"निरवपन् यानि"**[33] इति। अत्र नकारस्य "ह्रस्वादन्तौ नङौ" इत्यनेन सूत्रेण द्वित्वं प्राप्तम्। किन्तु नकारस्य परे यकारः अस्ति इति कृत्वा नकारस्य द्वित्वं न भवति। तादृशस्थले विरळपाठः अपिदृश्यते। तथा च शिक्षावचनम् -

**नकारान्तं पदं पूर्वं यवहेषु परेषु च।**
**नकारयवहास्तत्र त्वसंयुक्ताः प्रकीर्तिताः।**[34]इति

एतादृशरूपेण अनेकविधद्वित्वप्राप्तिनिषेधविषयाः व्यासशिक्षायां निरूपिताः। तत्सङ्गृह्य शोधपत्रेऽस्मिन् यथामति निरूपितम्। शम्।

**उपयुक्तग्रन्थसूची**


तैत्तिरीयप्रातिशाख्यम् - गोमठं पब्लिकेषन्स्, मैसूर्, 1931
व्यासशिक्षा - वेदमीमांसानुसन्धानकेन्द्रः, वाराणसी, 1976
पाणिनीयशिक्षा - चैखम्बा पब्लिकेषन्स्, वाराणसी, 1984
तैत्तिरीयोपनिषत् भाष्यम् - चैखम्बाविद्याभवन्, वाराणसी, 1979
सर्वलक्षणमञ्जरी - सान्दीपनी गुरुकुलसेवा ट्रस्ट्, हैदराबाद्, 2024


**अन्त्यटिप्पणी**

1. तै.उ.भा – 1.2
2. पा.शि – 41-42
3. तै.उ.भा – 1.2
4. व्या.शि.पृ.सं -14-15
5. व्या.शि - 337
6. तै.सं – 1.1.1
7. तै.सं – 1.7.1
8. तै.सं – 5-3-10
9. व्या.शि - 338
10. तै.सं – 5-1-1
11. तै.सं – 3-5-8
12. व्या.शि - 339
13. तै.सं – 1-6-12
14. व्या.शि - 340
15. तै.सं – 2-4-2
16. तै.सं – 1-8-15
17. व्या.शि - 341
18. तै.सं – 1-7-2
19. व्या.शि - 342
20. तै.सं – 2-1-1
21. व्या.शि - 360
22. तै.सं – 2-2-11
23. व्या.शि - 361
24. तै.सं – 1-1-1
25. तै.प्रा – 14-9
26. व्या.शि - 362
27. तै.सं – 5-6-19
28. तै.सं – 1-1-2
29. तै.सं – 5-4-8
30. व्या.शि - 363
31. तै.सं – 4-5-5
32. व्या.शि - 364
33. तै.सं – 2-4-1
34. व्या.शि.स.ल.म. पृ.सं - 138